


श्रीमज्जगद्गुरुशङ्कराचार्य महासंस्थानम् दक्षिणाम्नाय श्रीशारदापीठम्, शृङ्गेरी

अहं ब्रह्मास्मि







# श्रीशङ्कराचार्यपूजाकल्पः

श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्
दक्षिणाम्नायश्रीशारदापीठम्
शृङ्गगिरिः

## श्रीगुरुवन्दनम्

शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।
किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥ १ ॥

प्रह्लादवरदो देवो यो नृसिंहः परो हरिः ।
नृसिंहोपासकं नित्यं तं नृसिंहगुरुं भजे ॥ २ ॥

श्रीसच्चिदानन्द शिवाभिनव्यनृसिंहभारत्यभिधान् यतीन्द्रान् ।
विद्यानिधीन् मन्त्रनिधीन् सदात्मनिष्ठान् भजे मानवशम्भुरूपान् ॥ ३ ॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥ ४ ॥

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥ ५ ॥

अज्ञानां जाह्नवीतीर्थं विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥ ६ ॥

विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥ ७ ॥

## बिरुदावलिः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-
पदवाक्यप्रमाणपारावारपारीण-यमनियमासन-
प्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ-
तपश्चक्रवर्ति-अनाद्यविच्छिन्नश्रीशङ्कराचार्यगुरुपरम्पराप्राप्त-
षड्दर्शनस्थापनाचार्य-व्याख्यानसिंहासनाधीश्वर-सकलनिगमागमसारहृदय-
साङ्ख्यत्रयप्रतिपादक-वैदिकमार्गप्रवर्तक-सर्वतन्त्रस्वतन्त्र-आदिराजधानी-विद्यानगरमहाराजधानी-
कर्णाटकसिंहासनप्रतिष्ठापनाचार्य-श्रीमद्राजाधिराजगुरु-
भूमण्डलाचार्य-ऋष्यशृङ्गपुरवराधीश्वर-तुङ्गभद्रातीरवासि-श्रीमद्विद्याशङ्करपादपद्माराधक-
श्रीमज्जगद्गुरु-श्रीमदभिनवविद्यातीर्थमहास्वामिगुरुकरकमलसञ्जात-
श्रीमज्जगद्गुरु-श्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जात-
श्रीमज्जगद्गुरु-श्रीविधुशेखरभारती-महास्वामिनाञ्च चरणारविन्दयोः साष्टाङ्गप्रणामान् समर्पयामः ॥

# श्रीशङ्कराचार्यपूजाकल्पः

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

(प्राणायामः) **सङ्कल्पः** – शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीये परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे भारतवर्षे भरतखण्डे जम्बूद्वीपे दण्डकारण्ये गोदावर्याः दक्षिणे तीरे शलिवाहनशके बौद्धावतारे रामक्षेत्रे अस्मिन् वर्तमाने व्यावहारिके प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये क्रोधिनाम संवत्सरे उत्तरायणे वसन्त-ऋतौ वैशाखमासे शुक्लपक्षे भानुवासरयुक्तायाम् आर्द्रानक्षत्रयुक्तायां शुभयोगशुभकरण-एवङ्गुणविशेषविशिष्टायां पञ्चम्यां शुभतिथौ ममोपात्तसमस्त-दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं अस्माकं सहकुटुम्बानां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थम् इष्टकाम्यार्थ-सिद्ध्यर्थं सर्वारिष्टनिवृत्त्यर्थं धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिद्ध्यर्थं चिन्तितसर्वाभीष्टसिद्ध्यर्थं सद्विद्या-सद्बुद्धिप्राप्त्यर्थं, चित्तशान्ति-सुख-सन्तोषाद्यभिवृद्ध्यर्थं, देशोपप्लवनिवृत्त्यर्थं श्रीशङ्करभगवत्पूज्यपादाचार्यस्वामिप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्तिध्यानावाहनादिषोडशोपचारपूजां करिष्ये । तदङ्गत्वेन कलशार्चनं शङ्खार्चनं महागणपतिपूजाञ्च करिष्ये ॥

**कलशपूजा** – (कलशं गन्धपुष्पाक्षतैरलङ्कृत्य)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः ।
आयान्तु गुरुपूजार्थं दुरितक्षयकारकाः ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

**शङ्खपूजा** – कलशोदकेन शङ्खं प्रक्षाल्य, शङ्खमापूर्य शङ्खं गन्धाक्षतपत्रपुष्पैरभ्यर्च्य, शङ्खं स्पृष्ट्वा –

शङ्खं चन्द्रार्कदैवत्यं वारुणं चाधिदैवतम् ।
पृष्ठे प्रजापतिस्तत्र अग्रे गङ्गासरस्वती ॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।
शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत् ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तुते ॥

गर्भादेवारिनारीणां विशीर्यन्ते सहस्रधा ।
तव नादेन पाताले पाञ्चजन्य नमोऽस्तुते ॥

दर्शनादेव शङ्खस्य किं पुनः स्पर्शनेन तु ।
विलयं यान्ति पापानि हिमवद्भास्करोदये ॥

नत्वा शङ्खं करे स्पृष्ट्वा मन्त्रैरेतैस्तु वैष्णवैः ।
यः स्नापयति गोविन्दं तस्य पुण्यमनन्तकम् ॥

शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यायुतं दहेत् ॥

पाञ्चजन्याय विद्महे विष्णुप्रियाय धीमहि ॥ तन्नश्शङ्खः प्रचोदयात् ॥

शङ्खोदकं कलशे किञ्चिन्निक्षिप्य, देवस्यार्घ्यं दत्वा, शङ्खोदकेन पूजाद्रव्याणि पूजोपकरणानि च प्रोक्ष्य; आत्मानं प्रोक्ष्य तच्छेषं विसृज्य ॥ पुनः शङ्खं पूरयित्वा ॥ महागणपतिं सम्पूज्य ।

**ध्यानम्**

कैलासाचलमध्यस्थं कामिताभीष्टदायकम् ।
ब्रह्मादिप्रार्थनाप्राप्तदिव्यमानुषविग्रहम् ॥

भक्तानुग्रहणैकान्तशान्तस्वान्तसमुज्वलम् ।
सर्वज्ञं संयमीन्द्राणां सार्वभौमं जगद्गुरुम् ॥

किङ्करीभूतभक्तैनःपङ्कजातविशोषणम् ।
ध्यायामि शङ्कराचार्यं सर्वलोकैकशङ्करम् ॥

चिन्मुद्रां दक्षहस्ते प्रणतजनमहाबोधदात्रीं दधानं
वामे नम्रेष्टदानप्रकटनचतुरं चिह्नमप्यादधानम् ।
कारुण्यापारवार्धिं यतिवरवपुषं शङ्करं शङ्करांशं
चन्द्राहङ्कारहुङ्कृत्स्मितलसितमुखं भावयाम्यन्तरङ्गे ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – ध्यायामि ।

सद्गुरो शङ्कराचार्य रूपान्तरितविग्रह ।
साक्षात् श्रीदक्षिणामूर्ते कृपयाऽऽवाहितो भव ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – आवाहयामि ।

आर्याम्बागर्भसम्भूत मातृवात्सल्यभाजन ।
मातृदेव ददाम्येतद्रत्नसिंहासनं शुभम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – आसनं समर्पयामि ।

विद्याधिराजसत्पौत्र विद्याव्यासङ्गतत्पर ।
विश्वविख्यातवैदुष्य पाद्यमेतद्ददाम्यहम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – पादारविन्दयोः पाद्यं पाद्यं समर्पयामि ।

शिवगुर्वन्वयाम्भोधिशरत्पर्वनिशाकर ।
शिवावतार भगवन् गृहाणार्घ्यं नमोऽस्तु ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – हस्तयोः अर्घ्यमर्घ्यं समर्पयामि ।

दरिद्रब्राह्मणीसद्मस्वर्णामलकवर्षक ।
विस्मापकस्वात्मवृत्त ददाम्याचमनीयकम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – मुखे आचमनीयं समर्पयामि ।

जननीसमनुज्ञात संन्यासाश्रमसङ्ग्रह ।
गन्धर्वशापशमन मधुपर्कं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – मधुपर्कं निवेदयामि । पुनराचमनीयं समर्पयामि ॥

गोविन्दभगवत्पादपादसेवाधुरन्धर ।
महावाक्योपदेशाढ्य स्नाहि पञ्चामृतद्रवैः ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – पञ्चामृतस्नानं समर्पयामि ।

वाराणसीपुरीरम्यगङ्गातीरनिषेवक ।
गङ्गादितीर्थैः श्रीरुद्रमन्त्रैस्त्वां स्नपयाम्यहम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – स्नानं समर्पयामि ।

भाष्यभागीरथीपाथःपवित्रीकृतभूतल ।
भाष्यप्रवचनासक्त वस्त्रयुग्मं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – वस्त्रं समर्पयामि ।

सनन्दनादिमेधाविपण्डितच्छात्रसंवृत ।
सर्वशास्त्रार्थनिपुण गन्धान् धारय सादरम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – दिव्यपरिमलगन्धान् धारयामि ।

वृद्धवेषप्रतिच्छन्नव्याससन्दर्शनोत्सुक ।
भस्मोद्धूलितसर्वाङ्ग भस्म दिव्यं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – भस्मोद्धूलनं समर्पयामि ।

व्यासदत्तवरप्राप्त षोडशाब्दायुरुज्वल ।
किङ्करीकृतभूपाल कुङ्कुमं ते ददाम्यहम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – कुङ्कुमचूर्णं समर्पयामि ।

श्रीमन्मण्डनमिश्रादिवादकेलिविशारद ।
दुर्वादतूलवातूल भज रुद्राक्षमालिकाम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – रुद्राक्षमालिकां समर्पयामि ।

श्रीमन्मण्डनकर्णोक्तमहावाक्यादिमन्त्रक ।
सुरेश्वराख्यासन्दायिन् बिल्वपत्रं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – बिल्वपत्रं समर्पयामि ।

सुरेशपद्मचरणहस्तामलकतोटकैः ।
अन्यैश्च शिष्यैः संवीत पुष्पमालां ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – पुष्पमालिकां समपर्ययामि ।

**पत्रपूजां करिष्ये ।**

शिवरूपाय नमः – बिल्वपत्रं समर्पयामि । शक्तिरूपाय नमः – कदम्बपत्रं समर्पयामि ।
विष्णुरूपाय नमः – तुलसीपत्रं समर्पयामि । लक्ष्मीरूपाय नमः – तामरसपत्रं समर्पयामि ।
ब्रह्मरूपाय नमः – दाडिमीपत्रं समर्पयामि । सरस्वतीरूपाय नमः – मल्लिकापत्रं समर्पयामि ।
गणपतिरूपाय नमः – दूर्वापत्रं समर्पयामि । षण्मुखरूपाय नमः – मरुवकपत्रं समर्पयामि ।
श्रीचक्ररूपाय नमः – अशोकपत्रं समर्पयामि । श्रीदक्षिणामूर्तिरूपाय नमः – नानाविधपत्राणि समर्पयामि ॥

**पुष्पपूजां करिष्ये ।**

शिवरूपाय नमः – जातीपुष्पं समर्पयामि । शक्तिरूपाय नमः – कदम्बपुष्पं समर्पयामि ।
विष्णुरूपाय नमः – तुलसीपुष्पं समर्पयामि । लक्ष्मीरूपाय नमः – पद्मपुष्पं समर्पयामि ।
ब्रह्मरूपाय नमः – श्वेतकमलपुष्पं समर्पयामि । सरस्वतीरूपाय नमः – मल्लिकापुष्पं समर्पयामि ।
गणपतिरूपाय नमः – कल्हारपुष्पं समर्पयामि । षण्मुखरूपाय नमः – जपापुष्पं समर्पयामि ।
श्रीचक्ररूपाय नमः – अशोकपुष्पं समर्पयामि । श्रीदक्षिणामूर्तिरूपाय नमः – नानाविधपुष्पाणि समर्पयामि ॥

**अष्टोत्तरशतनामपूजां करिष्ये ।**

| | | |
|---|---|---|
| श्रीशङ्कराचार्यवर्याय नमः | कार्याकार्यप्रबोधकाय नमः | १० |
| ब्रह्मानन्दप्रदायकाय नमः | ज्ञानमुद्राञ्चितकराय नमः | |
| अज्ञानतिमिरादित्याय नमः | शिष्यहृत्तापहारकाय नमः | |
| सुज्ञानाम्बुधिचन्द्रमसे नमः | परिव्राजाश्रमोद्धर्त्रे नमः | |
| वर्णाश्रमप्रतिष्ठात्रे नमः | सर्वतन्त्रस्वतन्त्रधिये नमः | |
| श्रीमते नमः | अद्वैतस्थापनाचार्याय नमः | |
| मुक्तिप्रदायकाय नमः | साक्षाच्छङ्कररूपधृते नमः | |
| शिष्योपदेशनिरताय नमः | षण्मतस्थापनाचार्याय नमः | |
| भक्ताभीष्टप्रदायकाय नमः | त्रयीमार्गप्रकाशकाय नमः | |
| सूक्ष्मतत्त्वरहस्यज्ञाय नमः | वेदवेदान्ततत्त्वज्ञाय नमः | २० |

दुर्वादिमतखण्डनाय नमः
वैराग्यनिरताय नमः
शान्ताय नमः
संसारार्णवतारकाय नमः
प्रसन्नवदनाम्भोजाय नमः
परमार्थप्रकाशकाय नमः
पुराणस्मृतिसारज्ञाय नमः
नित्यतृप्ताय नमः
महते नमः
शुचये नमः ३०
नित्यानन्दाय नमः
निरातङ्काय नमः
निस्सङ्गाय नमः
निर्मलात्मकाय नमः
निर्ममाय नमः
निरहङ्काराय नमः
विश्ववन्द्यपदाम्बुजाय नमः
सत्त्वप्रधानाय नमः
सद्भावाय नमः
सङ्ख्यातीतगुणोज्ज्वलाय नमः ४०
अनघाय नमः
सारहृदयाय नमः
सुधिये नमः
सारस्वतप्रदाय नमः
सत्यात्मने नमः
पुण्यशीलाय नमः
साङ्ख्ययोगविचक्षणाय नमः
तपोराशये नमः
महातेजसे नमः
गुणत्रयविभागविदे नमः ५०
कलिघ्नाय नमः
कालकर्मज्ञाय नमः
तमोगुणनिवारकाय नमः
भगवते नमः

भारतीजेत्रे नमः
शारदाह्वानपण्डिताय नमः
धर्माधर्मविभागज्ञाय नमः
लक्ष्यभेदप्रदर्शकाय नमः
नादबिन्दुकलाभिज्ञाय नमः
योगिहृत्पद्मभास्कराय नमः ६०
अतीन्द्रियज्ञाननिधये नमः
नित्यानित्यविवेकवते नमः
चिदानन्दाय नमः
चिन्मयात्मने नमः
परकायप्रवेशकृते नमः
अमानुषचरित्राढ्याय नमः
क्षेमदायिने नमः
क्षमाकराय नमः
भव्याय नमः
भद्रप्रदाय नमः ७०
भूरिमहिम्ने नमः
विश्वरञ्जकाय नमः
स्वप्रकाशाय नमः
सदाधाराय नमः
विश्वबन्धवे नमः
शुभोदयाय नमः
विशालकीर्तये नमः
वागीशाय नमः
सर्वलोकहितोत्सुकाय नमः
कैलासयात्रा-सम्प्राप्त-चन्द्रमौलि-प्रपूजकाय नमः ८०
काञ्च्यां श्रीचक्रराजाख्य-यन्त्रस्थापन-दीक्षिताय नमः
श्रीचक्रात्मक-ताटङ्क-तोषिताम्बा-मनोरथाय नमः
श्रीब्रह्मसूत्रोपनिषद्भाष्यादि-ग्रन्थकल्पकाय नमः
चतुर्दिक्चतुराम्नाय प्रतिष्ठात्रे नमः
महामतये नमः
द्विसप्ततिमतोच्छेत्रे नमः
सर्वदिग्विजयप्रभवे नमः
काषायवसनोपेताय नमः

भस्मोद्धूलितविग्रहाय नमः
ज्ञानात्मकैकदण्डाढ्याय नमः ९०
कमण्डलुलसत्कराय नमः
गुरुभूमण्डलाचार्याय नमः
भगवत्पादसंज्ञकाय नमः
व्याससन्दर्शनप्रीताय नमः
ऋष्यशृङ्गपुरेश्वराय नमः
सौन्दर्यलहरीमुख्य-बहुस्तोत्र-विधायकाय नमः
चतुष्षष्टिकलाभिज्ञाय नमः
ब्रह्मराक्षसमोक्षदाय नमः

श्रीमन्मण्डनमिश्राख्य-स्वयम्भूजय-सन्नुताय नमः
तोटकाचार्यसम्पूज्याय नमः १००
पद्मपादार्चिताङ्घ्रिकाय नमः
हस्तामलक-योगीन्द्र-ब्रह्मज्ञान-प्रदायकाय नमः
सुरेश्वराख्य-सच्छिष्य-सन्न्यासाश्रमदायकाय नमः
नृसिंहभक्ताय नमः
सद्रत्नगर्भहेरम्ब-पूजकाय नमः
व्याख्यासिंहासनाधीशाय नमः
जगत्पूज्याय नमः
जगद्गुरवे नमः १०८

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – अष्टोत्तरशतनामार्चनं समर्पयामि ।

सर्वज्ञपीठिकारोहसमुत्सुकितमानस ।
सर्वज्ञमूर्ते सर्वात्मन् धूपमाजिघ्र सादरम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – धूपमाघ्रापयामि ।

सरस्वतीकृतप्रश्नोत्तरदानविचक्षण ।
शृङ्गाद्रिस्थानतत्संस्थाकारिन् दीपं गृहाण भोः ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – दीपं दर्शयामि ।

धूपदीपानन्तरम् आचमनीयं समर्पयामि ।

षण्मतस्थापनाचार्य षड्दर्शनविशारद ।
गृहाण षड्रसोपेतं भक्ष्यभोज्यादिकं प्रभो ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – नैवेद्यं निवेदयामि ।

चतुर्दिक्चतुराम्नायव्यवस्थापक शङ्कर ।
सर्वलोकैकसम्पूज्य पानीयं प्रतिगृह्यताम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – पानीयं समर्पयामि ।

उत्तरापोशनं, हस्तप्रक्षालनं, पादप्रक्षालनं समर्पयामि । नैवेद्यानन्तरम् आचमनीयं समर्पयामि ।

सर्वलोकसुविख्यातयशोराशिनिशाकर ।
सर्वात्मभूतसुगुरो ताम्बूलं प्रददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – ताम्बूलं समर्पयामि ।

प्रस्थानत्रितयीभाष्यनिर्माणैकविशारद ।
अज्ञानतिमिरोत्सारिन् पश्य नीराजनप्रभाम् ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – कर्पूरनीराजनं दर्शयामि ।

श्रीविद्यादिमहामन्त्रमाहात्म्यपरिदर्शक ।
मन्त्रसारज्ञ भगवन् मन्त्रपुष्पं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – मन्त्रपुष्पं समर्पयामि ।

वर्णाश्रमसदाचारसंरक्षणविचक्षण ।
सुवर्णवर्णवर्ष्माढ्य स्वर्णपुष्पं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – स्वर्णपुष्पं समर्पयामि ।

प्रदक्षिणीकृताशेषभारताजिर शङ्कर ।
प्रदक्षिणं करोमि त्वां प्रसन्नवदनाम्बुज ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – प्रदक्षिणं समर्पयामि ।

इन्द्रोपेन्द्रविरिञ्चादिकिरीटोद्घृष्टपादुक ।
नमस्करोमि सततं तव पादसरोरुहे ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥

श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्तिककारमन्यान् अस्मद्गुरून् सन्ततमानतोऽस्मि ॥

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

चिन्मुद्रां दक्षहस्ते प्रणतजनमहाबोधदात्रीं दधानं
वामे नम्रेष्टदानप्रकटनचतुरं चिह्नमप्यादधानम् ।
कारुण्यापारवार्धिं यतिवरवपुषं शङ्करं शङ्करांशं
चन्द्राहङ्कारहुङ्कृत्स्मितलसितमुखं भावयाम्यन्तरङ्गे ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – नमस्कारान् समर्पयामि ।

प्रसन्नहृदयाम्भोज प्रपन्नार्तिप्रभञ्जन ।
प्रकृष्टज्ञानमाहात्म्य प्रसन्नार्घ्यं ददामि ते ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – प्रसन्नार्घ्यं समर्पयामि ।

अद्वैतसारसर्वस्वसङ्ग्रहोत्सुकमानस ।
शिष्योपदेशप्रणयिन् प्रार्थनां ते समर्पये ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – प्रार्थनां समर्पयामि ।

कैलासशैलगमनपरिनिष्ठितमानस ।
छत्रचामरगीताद्यैः सुप्रीतो वरदो भव ॥

श्रीमत् शङ्करभगवत्पूज्यपादाचार्यस्वामिने नमः – सर्वोपचारान् समर्पयामि ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजाविधिं न जानामि क्षमस्व परमेश्वर ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

अनया पूजया श्रीमत् शङ्करभगवत्पूज्यपादाचार्याः सुप्रीताः सुप्रसन्नाः वरदा भवन्तु ॥

॥ इति श्रीमत् शङ्करभगवत्पूज्यपादाचार्यपूजाकल्पः ॥

# अथ कथा

**एकश्लोकीशङ्करदिग्विजयः**

आर्याम्बाजठरे जनिर्द्विजसतीदारिद्र्यनिर्मूलनं
संन्यासाश्रयणं गुरूपसदनं श्रीमण्डनादेर्जयः ।
शिष्यौघग्रहणं सुभाष्यरचनं सर्वज्ञपीठाश्रयः
पीठानां रचनेति सङ्ग्रहमयी सैषा कथा शाङ्करी ॥

अवतीर्णश्च कालट्यां केदारेऽन्तर्हितश्च यः ।
चतुष्पीठप्रतिष्ठाता जयताच्छङ्करो गुरुः ॥

**जगद्गुरु श्रीविद्यारण्यमहास्वामिभिः विरचितः**

## श्रीमच्छङ्करदिग्विजयः

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
प्राचीनशङ्करजये सारः सङ्गृह्यते स्फुटम् ॥ १.१ ॥

ततो महेशः किल केरलेषु
श्रीमद् वृषाद्रौ करुणासमुद्रः ।
पूर्णानदीपुण्यतटे स्वयंभू-
लिङ्गात्मनाऽनङ्गधगाविरासीत् ॥ २.१ ॥

तस्येश्वरस्य प्रणतार्तिहर्तुः
प्रसादतः प्राप्तनिरीतिभावः ।
कश्चित्तदभ्याशगतोऽग्रहारः
कालट्यभिख्योऽस्ति महान्मनोज्ञः ॥ २.३ ॥

कश्चिद्विपश्चिदिह निश्चलधीर्विरेजे
विद्याधिराज इति विश्रुतनामधेयः ।
रुद्रो वृषाद्रिनिलयोऽवतरीतुकामः
यत्पुत्रमात्मपितरं समरोचयत्सः ॥ २.४ ॥

पुत्रोऽभवत्तस्य पुरात्तपुण्यैः
सुब्रह्मतेजाः शिवगुर्वभिख्यः ।
ज्ञाने शिवो यो वचने गुरुस्त-
स्यान्वर्थनामाऽकृत लब्धवर्णः ॥ २.५ ॥

स ब्रह्मचारी गुरुगेहवासी
तत्कार्यकारी विहितान्नभोजी ।
सायम्प्रभातं च हुताशसेवी
व्रतेन वेदं निजमध्यगीष्ट ॥ २.६ ॥

बह्वर्थदायिषु बहुष्वपि सत्सु देशे
कन्याप्रदातृषु परीक्ष्य विशिष्टजन्म ।
कन्यामयाचत सुताय स विप्रवर्यो
विप्रं विशिष्टकुलजं प्रथितानुभावः ॥ २.२८ ॥

विद्याधिराजमघपण्डितनामधेयौ
सम्प्रत्ययं व्यतनुतामभिपूज्य दैवम् ।
सम्यङ्मुहूर्तमवलम्ब्य विचारणीया
मौहूर्तिका इति परस्परमूचिवांसौ ॥ २.३३ ॥

उद्वाह्य शास्त्रविधिना विहिते मुहूर्ते
तौ संमुदं बहुमवापतुराप्तकामौ ।
तत्रागतो भृशममोदत बन्धुवर्गः
किं भाषितेन बहुना मुदमाप वर्गः ॥ २.३४ ॥

गर्भं दधार शिवगर्भमसौ मृगाक्षी
गर्भोऽप्यवर्धत शनैरभवच्छरीरम् ।
तेजोऽतिरेकविनिवारित दृष्टिपात-
विश्वं रवेर्दिवसमध्य इवोग्रतेजः ॥ २.५७ ॥

लग्ने शुभे शुभयुते सुषुवे कुमारं
श्रीपार्वतीव सुखिनी शुभवीक्षिते च ।
जाया सती शिवगुरोर्निजतुङ्गसंस्थे
सूर्ये कुजे रविसुते च गुरौ च केन्द्रे ॥ २.७१ ॥

यत्पश्यतां शिशुरसौ कुरुते शमग्र्यं
तेनाकृतास्य जनकः किल शङ्कराख्याम् ।
यद्वा चिराय किल शङ्करसम्प्रसादात्
जातस्ततो व्यधित शङ्करनामधेयम् ॥ २.८३ ॥

# *Jagadguru Sri Adi Shankaracharya*




अवतीर्णश्च कालट्यां केदारेऽन्तर्हितश्च यः।
चतुष्पीठप्रतिष्ठाता जयतात् शङ्करो गुरुः॥